श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री सच्चिदानन्दशिवाभिनवनृसिंहभारती स्वामिभिः विरचितं

# ॥ श्री नृसिंहभुजङ्गप्रयातस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness* *śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहभुजङ्गप्रयातस्तोत्रम् ॥

ऋतं कर्तुमेवाशु नम्रस्य वाक्यं
सभास्तम्भमध्याद्य आविर्बभूव।
तमानम्रलोकेष्टदानप्रचण्डं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 1 ॥

इनान्तर्दृगन्तश्च गाङ्गेयदेहं
सदोपासते यं नराः शुद्धचित्ताः।
तमस्ताघमेनोनिवृत्त्यै नितान्तं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 2 ॥

शिवं शैववर्या हरिं वैष्णवाग्र्याः
पराशक्तिमाहुस्तथा शक्तिभक्ताः।
यमेवाभिधाभिः परं तं विभिन्नं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 3 ॥

कृपासागरं क्लिष्टरक्षाधुरीणं
कृपाणं महापापवृक्षौघभेदे।
नतालीष्टवाराशिराकाशशाङ्कं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 4 ॥

जगन्नेति नेतीति वाक्यैर्निषिद्ध्या -
वशिष्टं परब्रह्मरूपं महान्तः।

स्वरूपेण विज्ञाय मुक्ता हि यं तं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 5 ॥

नताम्भोगसक्तानपीहाशु भक्तिं
विरक्तिं च दत्वा दृढां मुक्तिकामान्।
विधातुं करे कङ्कणं धारयन्तं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 6 ॥

नरो यन्मनोर्जापतो भक्तिभावा -
च्छरीरेण तेनैव पश्यत्यमोघाम्।
तनुं नारसिंहस्य वक्तीति वेदो
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 7 ॥

यदङ्घ्र्यब्जसेवापराणां नराणां
विरक्तिर्दृढा जायतेऽर्थेषु शीघ्रम्।
तमङ्गप्रभाधूतपूर्णेन्दुकोटिं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 8 ॥

रथाङ्गं पिनाकं वरं चाभयं यो
विधत्ते कराब्जैः कृपावारिराशिः।
तमिन्द्वच्छदेहं प्रसन्नास्यपद्मं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 9 ॥

पिनाकं रथाङ्गं वरं चाभयं च
प्रफुल्लाम्बुजाकारहस्तैर्दधानम्।
फणीन्द्रातपत्रं शुचीनेन्दुनेत्रं
नमस्कुर्महे शैलवासं नृसिंहम् ॥ 10 ॥

विवेकं विरक्तिं शमादेश्च षट्कं
मुमुक्षां च सम्प्राप्य वेदान्तजालैः।
यतन्ते विबोधाय यस्यानिशं तं
नमस्कुर्महे शैलवासं नृसिंहम्॥ **11**॥

सदा नन्दिनीतीरवासैकलोलं
मुदा भक्तलोकं दृशा पालयन्तम्।
विदामग्रगण्या नताः स्युर्यदङ्घ्रौ
नमस्कुर्महे शैलवासं नृसिंहम्॥ **12**॥

यदीयस्वरूपं शिखा वेदराशे -
रजस्रं मुदा सम्यगुद्घोषयन्ति।
नलिन्यास्तटे स्वैरसञ्चारशीलं
चिदानन्दरूपं तमीडे नृसिंहम्॥ **13**॥

यमाहुर्हि देहं हृषीकाणि केचित् -
परेऽसूंस्तथा बुद्धिशून्ये तथान्ये।
यदज्ञानमुग्धा जना नास्तिकाग्र्याः
सदानन्दरूपं तमीडे नृसिंहम्॥ **14**॥

सदानन्दचिद्रूपमाम्नायशीर्षै -
र्विचार्यार्यवक्त्राद्यतीन्द्रा यदीयम्।
सुखेनासते चित्तकञ्जे दधानाः
सदानन्दचिद्रूपमीडे नृसिंहम्॥ **15**॥

पुरा स्तम्भमध्याद्य आविर्बभूव
स्वभक्तस्य कर्तुं वचस्तथ्यमाशु।
तमानन्दकारुण्यपूर्णान्तरङ्गं
बुधा भावयुक्ता भजध्वं नृसिंहम्॥ **16**॥

पुरा शङ्करार्या धराधीशभृत्यै -
विनिक्षिप्तवह्निप्रतप्तस्वदेहाः।
स्तुवन्ति स्म यं दाहशान्त्यै जवात्तं
बुधा भावयुक्ता भजध्वं नृसिंहम्॥ **17**॥

सदेमानि भक्त्याख्यसूत्रेण दृब्धा -
न्यमोघानि रत्नानि कण्ठे जना ये।
धरिष्यन्ति तान्मुक्तिकान्ता वृणीते
सखीभिर्वृता शान्तिदान्त्यादिमाभिः॥ **18**॥

॥ इति श्री नृसिंहभुजङ्गप्रयातस्तोत्रं समाप्तम्॥